# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

### प्रथमसत्रार्द्धम्

### PGDCVS-1
### प्रथमपत्रम्

प्रस्तावना –

- वैदिकवाङ्मये ऋग्वेदीयसूक्तानाम् अध्ययनम् अतीव महत्त्वं भजते। चतुर्षु वेदेषु अभ्यर्हितस्य वेदस्य सूक्ताध्ययनम् अस्मिन् पत्रे विधीयते। सहैव शुक्लयजुर्वेदीयपुरुषसूक्तस्य, शिवसङ्कल्पसूक्तस्य, अथर्ववेदस्य पृथिवीसूक्तस्य च अध्ययनम् अस्मिन् पत्रे विधीयते।

उद्देश्यम् –

- विविधसूक्तानां भाष्याध्ययनम्।
- शुक्लयजुर्वेदप्रोक्तं पुरुषसूक्ताध्ययनेन सृष्टिविषयकज्ञानार्जनम्।

सङ्गतिः –

- वैदिकवाङ्मये ऋग्वेदस्य स्थानं महत्त्वपूर्णमस्ति। अतः ऋग्वेदस्य प्रमुखसूक्तानाम् अध्ययनम् अत्र निहितम्।

| पत्र कोड एवं विषय | पाठ्यवस्तु विवरण | क्रेडिट |
|---|---|---|
| PGDCVS-1 | विषय | कुल 5 |
| प्रथम पत्र | Unit – 1<br>• अग्निसूक्तम् (ऋ.1.1) इन्द्रसूक्तम् (ऋ.2.12)<br>• सवितृसूक्तम् (ऋ. 1.35) उषस्सूक्तम् (ऋ. 4.51) | 02 |
| | Unit – 2<br>• शु.य.वा.संहिता 31 तमः अध्यायः (पुरुषसूक्तम्) | 01 |
| | Unit – 3<br>• शिवसङ्कल्पसूक्तम् (वा.सं. 34. 1-6), आ ब्रह्मन् (वा.सं. 22.23), द्यौः शान्तिः (वा.सं. 36.17), विश्वानि देव (वा.सं. 30.3), यतो यतः (वा.सं. 36.22) | 01 |
| | Unit – 4<br>• पृथिवीसूक्तम् (अथ. 12. 1-20) | 01 |
| फलितांशः | प्रथमपत्रेऽस्मिन् प्रथमम् एककमधीत्य ऋग्वेदस्थ अग्नीन्द्रादिसूक्तानां ज्ञानं प्राप्स्यन्ति। द्वितीयमेककमधीत्य वाजसनेयिसंहितायाः पुरुषसूक्तस्य ज्ञानं प्राप्स्यन्ति। तृतीयमेककमधीत्य शिवसङ्कल्पादिविविधसूक्तमन्त्रादीनां ज्ञानं प्राप्स्यन्ति । चतुर्थमेककमधीत्य अथर्ववेदस्य पृथिवीसूक्तस्य ज्ञानं प्राप्स्यन्ति । सम्पूर्णपत्रमधीत्य विद्यार्थिनः वैदिकभाषायाः शैलीं सूक्तगतमन्त्राणामर्थं च ज्ञास्यन्ति। | |
| प्रश्नपत्राध्यापनविधिः | एतत्पत्रान्तर्गतान् विषयान् समासेन प्रस्तूय व्यासपद्धत्या अवबोधनम् । विविधसूक्तानाम् उच्चारणस्य वीडियोमाध्यमेन/प्रत्यक्षरूपेण वा प्रदर्शनम्। | |

D. Dayanidhi

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

**PGDCVS-2**
**द्वितीयपत्रम्**

प्रस्तावना –

- वैदिकवाङ्मये ऋग्वेदीयसूक्तानाम् अध्ययनम् अतीव महत्त्वं भजते । चतुर्षु वेदेषु अभ्यर्हितस्य वेदस्य सूक्ताध्ययनम् अस्मिन् पत्रे विधीयते । अत्र विष्णुसुक्तस्य, वाक्सूक्तस्य, रात्रिसूक्तस्य, रुद्रसूक्तस्य अध्ययनम्, अथर्ववेदीयवृष्टिसूक्तस्य च अध्ययनेन विद्यार्थिनः वैदिकसूक्तस विविधान् आयामान् ज्ञास्यन्तीति हेतोः अत्र एते विषयाः स्थापिताः ।

उद्देश्यम् –

- विविधसूक्तानां भाष्याध्ययनम् ।
- शुक्लयजुर्वेदप्रोक्तं 36 तमाध्यायस्य अध्ययनम् ।

सङ्गतिः –

- वैदिकवाङ्मये सूक्तानां स्थानं महत्त्वपूर्णमस्ति । अतः ऋग्वेदस्य प्रमुखसूक्तानाम् अध्ययनविषयः अत्र निहितः ।

| PGDCVS-2 | **विषय** | कुल 5 |
|---|---|---|
| **द्वितीय पत्र** | Unit – 1<br>• विष्णुसूक्तम् (1.154), रुद्रसूक्तम् (ऋ. 2.33)<br>• वाक्सूक्तम् (ऋ. 10.125), रात्रिसूक्तम् (ऋ. 10.127) | 02 |
| | Unit – 2<br>• वरुणसूक्तम् (ऋ. 1.25) | 01 |
| | Unit – 3<br>• शु.य.वा. संहिता अध्याय 36 (1-16) | 01 |
| | Unit – 4<br>• वृष्टिसूक्तम् (अथ. 4.15) | 01 |
| **फलितांशः** | प्रथममेककमधीत्य विद्यार्थिनः ऋग्वेदस्थविष्णुसूक्त-रुद्रसूक्तादीनां ज्ञानं प्राप्स्यन्ति । द्वितीयमेककमधीत्य ऋग्वेदस्थवरुणसूक्तस्य ज्ञानं प्राप्स्यन्ति । तृतीयमेककमधीत्य शुक्लयजुर्वेदस्य वाजसनेयिसंहितायाः षट्त्रिंशत्तमाध्यायस्य ज्ञानं प्राप्स्यन्ति । चतुर्थमेककमधीत्य विद्यार्थिनः अथर्ववेदस्य वृष्टिसूक्तस्य ज्ञानं प्राप्स्यन्ति । सम्पूर्णपत्रमधीत्य विद्यार्थिनः वैदिकभाषायाः शैलीं सूक्तगतमन्त्राणामर्थं च ज्ञास्यन्ति । | |
| **प्रश्नपत्राध्यापनविधिः** | एतत्पत्रान्तर्गतान् विषयान् समासेन प्रस्तूय व्यासपद्धत्या अवबोधनम् । विविधसूक्तानाम् उच्चारणस्य वीडियोमाध्यमेन/प्रत्यक्षरूपेण वा प्रदर्शनम् । | |

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

### PGDCVS-3
### तृतीयपत्रम्

प्रस्तावना –

- वैदिकवाङ्मये ऋग्वेदीयसूक्तानाम् अध्ययनम् अतीव महत्त्वं भजते । चतुर्षु वेदेषु अभ्यर्हितस्य वेदस्य सूक्ताध्ययनम् अस्मिन् पत्रे विधीयते । अत्र ऋग्वेदीयसर्गविचारमण्डितानि हिरण्यगर्भ-नासदीयसूक्ताभ्यां सह श्रद्धासूक्तादीनि अत्र निवेशितानि सन्ति ।

उद्देश्यम् –

- विविधसूक्तानां भाष्याध्ययनम् ।
- श्रौतप्रक्रियायाम् आश्रावणादिमन्त्राणां तात्पर्यज्ञानम् ।

सङ्गतिः –

- वैदिकवाङ्मये सूक्तानां स्थानं महत्त्वपूर्णमस्ति । अतः ऋग्वेदस्य प्रमुखसूक्तानाम् अध्ययनम् अत्र निहितम् । अत्र श्रौतयागे प्रयुज्यमानानाम् आश्रावणादिमन्त्राणां तात्पर्यज्ञानमावश्यकम् । अतः स विषयः यथाग्रन्थं निवेशितः ।

| PGDCVS-3 | विषय | कुल 5 |
|---|---|---|
| तृतीय पत्र | Unit – 1<br>• हिरण्यगर्भसूक्तम् (ऋ. 10.121), नासदीयसूक्तम् (ऋ. 10.129)<br>• अक्षसूक्तम् (ऋ. 10.34) | 02 |
| | Unit – 2<br>• श्रद्धासूक्तम् (ऋ. 10.151), संज्ञानसूक्तम् (ऋ. 10.191), साम्मनस्यसूक्तम् (अथ. 3.30) | 01 |
| | Unit – 3<br>• दानसूक्तम् (ऋ. 10.117), कालसूक्तम् (अथ. 19.53) | 01 |
| | Unit – 4<br>• आश्रावणादिमन्त्रोत्पत्तिकथनम् (तै.सं. 1.6.11), वात्सप्रसूक्तम् – (दिवस्परीत्यनुवाकः) (तै.सं. 4.2.2) | 01 |
| फलितांशः | प्रथममेककमधीत्य विद्यार्थिनः ऋग्वेदस्य हिरण्यगर्भादिविशिष्टसूक्तानां ज्ञानम् अर्जयिष्यन्ति । द्वितीयमेककमधीत्य ऋग्वेदस्थश्राद्धासूक्त-संज्ञानसूक्तयोः अर्थर्ववेदस्य साम्मनस्यसूक्तस्य च ज्ञानं प्राप्स्यन्ति । तृतीयमेककमधीत्य दानसूक्तस्य कालसूक्तस्य च ज्ञानं प्राप्स्यन्ति ।चतुर्थमेककमधीत्य श्रौतयागप्रयुक्तानाम् आश्रावणादिमन्त्राणाम् उत्पत्तिं ज्ञास्यन्ति । तैत्तिरीयसंहितोक्तवात्सप्रसूक्तस्य ज्ञानं प्राप्स्यन्ति । सम्पूर्णपत्रमधीत्य विद्यार्थिनः वैदिकभाषायाः शैलीं सूक्तगतमन्त्राणामर्थं च ज्ञास्यन्ति । | |
| प्रश्नपत्राध्यापनविधिः | एतत्पत्रान्तर्गतान् विषयान् समासेन प्रस्तूय व्यासपद्धत्या अवबोधनम् । विविधसूक्तानाम् उच्चारणस्य वीडियोमाध्यमेन/प्रत्यक्षरूपेण वा प्रदर्शनम् । | |

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

### PGDCVS-4
### चतुर्थपत्रम्

प्रस्तावना –

- ब्राह्मणसाहित्ये समाम्नाताः जलप्लावन-वाङ्मनस-संवाद-याज्ञवल्क्यसंवादादिविषयाः महत्त्वपूर्णविषयाः अत्र निवेशिताः सन्ति। वैदिकवाङ्मये ऋग्वेदीयसूक्तानाम् अध्ययनम् अतीव महत्त्वं भजते। चतुर्षु वेदेषु अभ्यर्हितस्य वेदस्य सूक्ताध्ययनम् अस्मिन् पत्रे विधीयते।

उद्देश्यम् –

- शुनःशेपाख्यानादिविविधाख्यान-संवादादिसूक्तानामध्ययनम्।

सङ्गतिः –

- वैदिकवाङ्मये वर्णितानां कतिपय आख्यानानां, संवादानां च अध्ययनेन वैदिकभाषायाः तत्त्वस्य च अधिगमनम्।

| **PGDCVS-4** | **विषय** | कुल 5 |
|---|---|---|
| **चतुर्थ पत्र** | Unit – 1<br>• ऐन्द्रमहाभिषेकः (ऐ.ब्रा. 8.3)<br>• शुनःशेपाख्यानम् (ऐ.ब्रा. 7.13) | 02 |
| | Unit – 2<br>• जलप्लावन (श.ब्रा. 1.8.1) | 01 |
| | Unit – 3<br>• वाङ्मनस-संवादः (श.ब्रा.) | 01 |
| | Unit – 4<br>• अग्निहोत्रगतजनक-याज्ञवल्यसंवादः (श.ब्रा.) | 01 |
| **फलितांशः** | प्रथमे एकके ऐन्द्रमहाभिषेकाधिगमप्रसङ्गे विद्यार्थिनः राज्ञां कर्तव्यं कथं स्यादिति ज्ञास्यन्ति। द्वितीये एकके जलप्लावनप्रसङ्गाध्ययनेन पुराणस्मृत्यादिषु प्रतिपादितसृष्टिविषयकः विषयः कथं वेदमूलकः इति ज्ञास्यन्ति।तृतीये एकके वाङ्मनससंवादस्य अध्ययनेन प्रजापतेः उपांशुयजनं किमर्थमिति ज्ञास्यन्ति।चतुर्थे एकके जनकयाज्ञवल्क्यसंवादमाध्यमेन यज्ञतत्त्वम् ज्ञास्यन्ति। सम्पूर्णपत्रमधीत्य विद्यार्थिनः ब्राह्मणग्रन्थेषु वर्णितविषयान् ज्ञास्यन्ति। | |
| **प्रश्नपत्राध्यापनविधिः** | एतत्पत्रान्तर्गतान् विषयान् समासेन प्रस्तुय व्यासपद्धत्या अवबोधनम्। | |

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

### द्वितीयसत्रार्द्धम्

### PGDCVS-5

### पञ्चमपत्रम्

प्रस्तावना –

- वैदिककर्मणि नित्यत्वेन उपदिष्टं सन्ध्योपासनाख्यं कर्म। तद्विषये तैत्तिरीयारण्यकाध्ययनेन ज्ञास्यन्ति। दशोपनिषत्सु मुख्या ईशोपनिषद्। ब्रह्मतत्त्वप्रतिपादने अनितरसाधारणा कृष्णयजुर्वेदीया कठोपिषद्। बृहदारण्यकोपनिषदि वर्णितः गार्गी-याज्ञवल्क्यसंवादः, याज्ञवल्क्य-मैत्रेयीसंवादः अति प्रसिद्धः। एतेषां विषयाणां ज्ञानमर्जयिष्यन्ति विद्यार्थिनः।

उद्देश्यम् –

- सन्ध्योपासनकर्मणः महत्त्वप्रतिपादनम्।
- उपनिषदि वर्णितं तत्त्वप्रतिपादनम्।
- याज्ञवल्क्यसंवादमाध्यमेन तत्त्वविवेचनम्।

सङ्गतिः –

- संवादादिसूक्तानामध्ययनात्परं नित्यकर्मत्वेन विहितस्य सन्ध्योपासनस्य महत्त्वज्ञानार्जनम्। उपनिषत्सु वर्णितानां तत्त्वानामधिगमनम्।

| **PGDCVS-5** | **विषय** | कुल 5 |
|---|---|---|
| **पंचम पत्र** | Unit – 1<br>• तैत्तिरीयारण्यकात् सन्ध्यायामुपयुक्तमन्त्राः (तै.आ. 2)<br>• ईशोपनिषत् (सम्पूर्णा) (शु.य.वा.सं. 40 तम अध्यायः) | 02 |
| | Unit – 2<br>• केनोपनिषत् सम्पूर्णा | 01 |
| | Unit – 3<br>• कठोपनिषदि प्रथमा वल्ली | 01 |
| | Unit – 4<br>• गार्गी-याज्ञवल्क्यसंवादः, याज्ञवल्क्य-मैत्रेयीसंवादः (बृह.उप.) | 01 |
| **फलितांशः** | प्रथमे एकके तैत्तिरीयारण्यके उपदिष्टान् सन्ध्यावन्दनमन्त्रान् अधीत्य नित्यकर्मणि सन्ध्यावन्दनस्य महत्त्वं ज्ञास्यन्ति। उपनिषत्सु ईशोपनिषदः महत्त्वं च ज्ञास्यन्ति। द्वितीये एकके सामवेदस्य केनोपनिषदम् अधीत्य प्रश्नोत्तरमाध्यमेन तत्त्वज्ञानविषयकं ज्ञानं प्राप्स्यन्ति।तृतीये एकके कठोपनिषदः अध्ययनेन नचिकेतसः आख्यानमाध्यमेन कीदृशः शिष्यः स्यादिति ज्ञानं प्राप्स्यन्ति। चतुर्थे एकके बृहदारण्यकोपनिषदि याज्ञवल्क्यसंवादस्य अध्ययनेन प्राचीनवैदिकस्त्रीणां वैदुष्यविषये साम्प्रतिकं ज्ञानं प्राप्स्यन्ति। सम्पूर्णपत्रस्याध्ययनेन आरण्यके उपनिषदि च वर्णितानां विषयाणां साम्प्रतिकं शास्त्रीयं च महत्त्वं ज्ञास्यन्ति। | |
| **प्रश्नपत्राध्यापनविधिः** | एतत्पत्रान्तर्गतान् विषयान् समासेन प्रस्तूय व्यासपद्धत्या अवबोधनम्। | |

D. Dayanath

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

### PGDCVS-6
### षष्ठपत्रम्

प्रस्तावना –

- चतुर्वेदभाष्यकृता सायणाचार्येण विरचिता ऋग्वेदभाष्यभूमिका वेदार्थज्ञानार्जने महत्त्वपूर्णग्रन्थः अस्ति । अतः स ग्रन्थः अत्र सन्निवेशितः । प्रसिद्धपाश्चात्यवैदिकविदुषामपि ज्ञानं पत्रस्यास्य अध्ययनेन प्राप्स्यन्ति ।

उद्देश्यम् –

- भूमिकालेखनपद्धतेः अवबोधनम् ।
- वेदापौरुषेयत्वप्रतिपादने सामर्थ्यसम्पादनम् ।
- यजुर्वेदस्य प्राधान्यावगमनम् ।
- पाश्चात्त्यवेदविदुषां विषये ज्ञानसम्पादनम् ।

सङ्गतिः –

- वैदिकतत्त्वानामधिगमे श्रीमत्सायणाचार्यविरचितायाः ऋग्वेदभाष्यभूमिकायाः महद्योगदानं वर्तते । अत एव स ग्रन्थः अत्र सन्निवेशितः । प्राचीनवेदभाष्यकाराणां सहैव पाश्चात्यवेदविदुषामपि ज्ञानं शोधदृष्ट्या महत्त्वपूर्णं वर्तते । अतः सः विषयः अत्र नियोजितः ।

| PGDCVS-6 | विषय | कुल 5 |
|---|---|---|
| षष्ठ पत्र | Unit – 1<br>• श्रीमत्सायणकृता ऋग्वेदभाष्यभूमिका (आदितः मन्त्रप्रामाण्यपर्यन्तम्)<br>• श्रीमत्सायणकृता ऋग्वेदभाष्यभूमिका (अर्थवादप्रामाण्यनिरूपणात् समाप्तिपर्यन्तो भागः) | 02 |
| | Unit – 2<br>• श्रीमत्सायणकृता ऋग्वेदभाष्यभूमिका (वेदाङ्गानामुपयोगिता) | 01 |
| | Unit – 3<br>• प्रसिद्धभारतीयवेदभाष्यकाराः | 01 |
| | Unit – 4<br>• प्रसिद्धपाश्चात्त्यवेदभाष्यकाराः | 01 |
| फलितांशः | ग्रन्थस्य भूमिका कथं स्यात्, विषयस्य प्रतिपादनं कथं कर्तव्यं, शास्त्रीयपद्धत्या तर्कप्रणाली कथं स्यात्, कीदृशस्य विषयस्य सन्निवेशः भूमिकायां स्यादित्यादिविषयणां ज्ञानं प्राप्स्यन्ति । ततः प्रसिद्धभारतीय-परम्परागतवेदभाष्यकाराणां पाश्चात्यवेदव्याख्यातॄणां विषये ज्ञानं प्राप्स्यन्ति । सम्पूर्णपत्रस्याध्ययनेन भूमिकाविषये वेदभाष्यकाराणां च विषये विद्यार्थिनः ज्ञानं प्राप्स्यन्ति । | |
| प्रश्नपत्राध्यापनविधिः | एतत्पत्रान्तर्गतान् विषयान् समासेन प्रस्तूय व्यासपद्धत्या अवबोधनम् । | |

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

### PGDCVS-7
### सप्तमपत्रम्

प्रस्तावना –

- वेदमन्त्राणां स्वरज्ञानं परमावश्यकम् । स्वरपरिवर्तनेन अर्थपरिवर्तनमपि भवति । वेदमन्त्राणां विस्वरपाठेन अनर्थः भवति । तन्निवारणाय स्वरनियमानाः ज्ञातव्याः । बहवः शिक्षाग्रन्थाः प्रातिशाख्यग्रन्थाः च स्वरविषयकनियमान् बोधयन्ति। पाणिनीयशिक्षायां 'मन्त्रो हीनः' इति पद्येन स्वरमहत्त्वं सुष्ठु प्रतिपादितम्।

उद्देश्यम् –

- वेदमन्त्राणां स्वरोच्चारणमहत्त्वकथनम्।
- वैदिकभाषायाः वैशिष्ट्यबोधनम्।
- वैदिकभाषायां प्रयुक्तानां विशिष्टशब्दानां ज्ञानम्।

सङ्गतिः –

- सर्वे वेदमन्त्राः स्वरपाठयुक्ताः भवन्ति । स्वरज्ञानं विना प्रयुक्तस्य मन्त्रस्य फलं न लभ्यते । अतः तज्ज्ञानाय एष विषयः अत्र निवेशितः ।

| **PGDCVS-7** | **विषय** | कुल 5 |
|---|---|---|
| **सप्तम पत्र** | Unit – 1<br>• वैदिकस्वरपरिचयः, सामान्यस्वरनियमाः<br>• प्रातिपदिकस्वराः, विभक्तिस्वराः, प्रत्ययस्वराश्च | 02 |
| | Unit – 2<br>• समासस्वरः आख्यातस्वरश्च | 01 |
| | Unit – 3<br>• वैदिकभाषायाः वैशिष्ट्यानि | 01 |
| | Unit – 4<br>• वैदिकभाषायां व्यत्ययः, लेट्-लकारः, तुमुनर्थकप्रत्ययाश्च | 01 |
| **फलितांशः** | प्रथमं द्वितीयं च एककम् अधीत्य विद्यार्थिनः वैदिकमन्त्रेषु स्वरस्य महत्त्वं, स्वरनियमान्, स्वरेण अर्थवैपरीत्यं कथं भवतीत्यादिविषयं ज्ञास्यन्ति । तृतीयं चतुर्थं च एककम् अधीत्य विद्यार्थिनः लौकिकभाषातः वैदिकभाषा कियद्वैशिष्ट्यं व्यत्ययश्च भवतीति ज्ञानं प्राप्स्यन्ति। | |
| **प्रश्नपत्राध्यापनविधिः** | एतत्पत्रान्तर्गतान् विषयान् समासेन प्रस्तूय व्यासपद्धत्या अवबोधनम्।<br>विविधमन्त्राणां स्वरोच्चारणभेदनस्य वीडियोमाध्यमेन/प्रत्यक्षरूपेण वा प्रदर्शनम्। | |

D. Dayanath

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

### PGDCVS-8

### सप्तमपत्रम्

प्रस्तावना –

- वेदानां षडङ्गानि भवन्ति । वेदाङ्गज्ञानं विना मन्त्रार्थः दुरबोधः । अतः समासेन वेदस्य षडङ्गानां लक्षणं प्रयोजनं चात्र बोध्यन्ते । वेदे वर्णितानां प्रकृति-विकृतियागानां परिचयः अपि अत्र निवेशितः ।

उद्देश्यम् –

- शिक्षादि षड् वेदाङ्गानां प्राथमिकं ज्ञानम् ।
- प्रकृति-विकृतियागानां परिचयः ।

सङ्गतिः –

- वेदार्थवगमनाय अपेक्षितं षडङ्गज्ञानम् । अपि च षडङ्गसहितवेदाध्ययनं श्रुतिविहितम् । प्रायः मन्त्राः विनियोगदृशा व्याख्याताः । अतः श्रुतौ वर्णितानां कतिपय प्रकृति-विकृतियागानां परिचयज्ञानम् ।

| **PGDCVS-8** | **विषय** | कुल 5 |
|---|---|---|
| **अष्टम पत्र** | Unit – 1<br>• वेदाङ्गानां परिचयः<br>• निरुक्तम् – षड्भावविकारः, नामपदानाम् आख्यातत्वम्, वेदमन्त्राणां सार्थकता | 02 |
| | Unit – 2<br>• निरुक्तस्योपयोगिता, निर्वचनसिद्धान्तः, दैवतकाण्डस्य भूमिका | 01 |
| | Unit – 3<br>• प्रमुखवैदिकच्छन्दांसि | 01 |
| | Unit – 4<br>• वैदिकयागानां सामान्यपरिचयः | 01 |
| **फलितांशः** | प्रथममेककमधीत्य विद्यार्थिनः व्याकरणादिषण्णां वेदाङ्गानां विषये ज्ञानं प्राप्स्यन्ति। द्वितीयमेककमधीत्य निरुक्तप्रोक्तं षड्भावविकारविषयकज्ञानं प्राप्स्यन्ति । तृतीयमेककमधीत्य विद्यार्थिनः गायत्री-उष्णिगादिप्रमुखवैदिकच्छन्दसां ज्ञानं प्राप्स्यन्ति । चतुर्थमेककमधीत्य विद्यार्थिनः दर्शपूर्णमासादिश्रौतयागानां सामान्यज्ञानं प्राप्स्त्यन्ति । | |
| **प्रश्नपत्राध्यापनविधिः** | एतत्पत्रान्तर्गतान् विषयान् समासेन प्रस्तूय व्यासपद्धत्या अवबोधनम् ।<br>विविधवैदिकयागानां वीडियोमाध्यमेन प्रदर्शनम् । | |

# केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली

## SYLLABUS FOR PG DIPLOMA IN VEDIC STUDIES

### PGDCVS-9
### नवमपत्रम्

प्रस्तावना –

- पाठ्यक्रमे अधीतविषयाणां परीक्षणं मूल्याङ्कनं च आवश्यकम्। अतः एतत् पत्रं परियोजनादिकार्याय निर्दिष्टम्।

उद्देश्यम् –

- प्रायोगिकादिकार्यद्वारा छात्राणां मूल्याङ्कनम्।

सङ्गतिः –

- प्रायोगिक-परियोजनादिद्वारा अधीतविषयस्य दार्ढ्यसम्पादनम्।

| PGDCVS-9 | **विषय** | कुल 2 |
|---|---|---|
| **नवम पत्र (प्रायोगिकम्)** | Unit – 1<br>• वाक्परीक्षा/सूक्तमन्त्रादिपाठोच्चारणप्रदर्शनम्/प्रदत्तकार्यम्/परियोजना | 02 |
| **फलितांशः** | मूल्याङ्कने साफल्यसम्पादनेन पाठ्यक्रमे उत्तीर्णाः भवन्ति। | |

पाठ्यक्रमे पत्राणां विभागः –

| | | |
|---|---|---|
| **प्रथम सत्रार्द्ध** | – | **04 पत्राणि (4x5 = 20 क्रेडिट)** |
| **द्वितीय सत्रार्द्ध** | – | **04 पत्राणि (4x5 = 20 क्रेडिट)** |
| **प्रदत्तकार्यम्/वाक्परीक्षा** | – | **01 पत्रम् (1x2 = 2 क्रेडिट)** |
| **आहत्य** | – | **09 पत्राणि (4+5 = 09 पत्राणि)** |
| **क्रेडिट** | – | **42 क्रेडिट (20+20+2 = 42 क्रेडिट)** |

D. Dayanath

श्रीनिवासवरखेडिः